


# मोहोपनिषद्

એ મંત્ર
જેનાથી મોહ ખુદ
મુંઝાઈ જાય
ને
મુરઝાઈ જાય
શું જોઈએ આથી વધુ
મોક્ષની પ્રાપ્તિ માટે ?

न्यायविशारद-न्यायाचार्य
महोपाध्यायश्रीयशोविजयगणिवरविरचिते
ज्ञानसारान्तर्गतमोहाष्टके
नवनिर्मितवृत्तिरूपा

# मोहोपनिषद्

• नवसर्जनम् - सम्पादनम् •

प्राचीनश्रुतोद्धारक
प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः
प.पू.आ.श्रीकल्याणबोधिसूरीश्वराः

प्रकाशकः
श्री जिनशासन आराधना ट्रस्ट

મૂળ કૃતિ : **જ્ઞાનસાર અંતર્ગત મોહાષ્ટક**

મૂળ કૃતિકાર : ન્યાયવિશારદ ન્યાયાચાર્ય મહોપાધ્યાય **શ્રીયશોવિજયજી** ગણિવર્ય

નવનિર્મિત સંસ્કૃત વૃત્તિ : **મોહોપનિષદ્**

નવસર્જન+સંપાદન : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.શ્રી **હેમચંદ્રસૂરીશ્વરજી** મહારાજાના શિષ્ય પ.પૂ.આ.શ્રી **કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા

વિષય : **મોહ-રહસ્ય**

વિશેષતા : મહોપાધ્યાયજીની શ્રેષ્ઠ કૃતિ એ કૃતિનું શ્રેષ્ઠ અષ્ટક એ અષ્ટકના અમૂલ્ય રહસ્યો ગાગરમાં સાગર.

વિ. સં. ૨૦૬૮ • વી. સં. ૨૫૩૮ • સને ૨૦૧૨

પ્રથમ આવૃત્તિ • પ્રતિ : ૫૦૦

*No Copyright. • Reproduction Welcome.*

## ❀ પ્રાપ્તિસ્થાન ❀

### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ

18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com

---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी



અનરાધાર અનુગ્રહ



अनन्तलब्धिनिधानः श्रीगौतमस्वामी

# पञ्चमगणधरः श्रीसुधर्मास्वामी



## કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

णमोत्थु णं समणस्स भगवओ महावीरस्स
श्री प्रेम-भुवनभानु-पद्म-जयघोष-हेमचन्द्रसूरिभ्यो नमः

# મોહ

અનાદિ કાળથી
લૂચ્ચું હસી રહ્યો છે એ
રમી રહ્યો છે ભયાનક રમત
ને ચાલી રહ્યો છે
એક ભેદી ચાલ

નથી ખુલ્યો આજ સુધી એનો ભેદ
ને માટે જ નથી ખુલ્યા
આત્મકલ્યાણના દ્વાર
ભ્રમિત છે એનાથી આત્મા
ને માટે જ કરતો રહે છે એ
ભવભ્રમણ.

એક પરમ પળે
એક પુણ્યપુરુષના

જ્ઞાનપ્રકાશમાં
ખુલ્લી પડી ગઈ
એની ચાલ
પરમ કારુણિક
એ મહાપુરુષે
વિશ્વને ઉપહાર આપ્યો
એ જ્ઞાનપ્રસાદીનો.

પરમ સૌભાગ્ય છે આપણું
કે પામ્યા એ જ્ઞાનપ્રસાદી
હવે તો ભ્રમ ટળે
ને ભ્રમણ ટળે

ચાલો.
સાર્થક કરીએ આપણે
આપણા પરમ સૌભાગ્યને.

– આ૦ કલ્યાણબોધિસૂરિ

## મોહમંત્ર
## હું + મારું

## નિર્મોહમંત્ર
## ન હું + ન મારું

# मोहोपनिषद्

श्रीवर्द्धमानं जिनवर्द्धमानं
सूरीन्द्रमेवं गुरुहेमचन्द्रम्।
प्रणम्य नम्यं रमणीयरम्यं
तनोमि मोहोपनिषत्-प्रबन्धम्॥

इह हि परमकारुणिको वाचकवरेण्यो मोहरहस्योद्घाटनमन्तरेण सत्त्वश्रेयोघटनम-सम्भाव्यमुपपश्यन्, तत्रैव यतमानतया

'मन्त्र-बला राजान' इत्युक्तिं स्मरन् मोह-राजमन्त्रमेव सप्रतिपक्षमुपन्यस्यन्नाह-

**अहं ममेति मन्त्रोऽयं,**
**मोहस्य जगदान्ध्यकृत्।**
**अयमेव हि नञ्पूर्वः,**
**प्रतिमन्त्रोऽपि मोहजित्॥१॥**

**अहम्**- कर्मोपाधिकलङ्किताऽऽत्म-रूपाश्रयस्वरूपभ्रान्त्युद्भूतसंवेदनम्, **मम**-अस्ववस्त्वाश्रयस्वस्वामिकमिदमित्याकार-कसम्भ्रमप्रयुक्तप्रतीतिः, **इति**- अनन्तरा-भिहितपदद्वयमात्रः, **अयम्**- श्रावण-

प्रत्यक्षविषयीभूतः, **जगतः** - सचराचरस्यापि लोकस्य, **आन्ध्यम्** - परमार्थदृग्भूतविवेकविलोचनविघातः, तत् कर्तुं शीलमस्येति **जगदान्ध्यकृत्**, **मोहस्य**-हिताहितविवेकव्यपाकरणविचक्षणस्य परमान्तरारातेः, **मन्त्रः** - आत्मप्रत्यपायोपायमननोपसम्प्राप्ततदत्राणत्वत्राणकरणप्रवणासाधनसिद्धपाठपद्धतिः।

अहो दुरन्तोऽयं मोहमन्त्र इति कथमेतत्प्रतिक्रियेत्यत्राह- **अयमेव** - विडम्बितविश्वत्रयोऽनन्तरमेवोदितो मोहमन्त्रः, एवकारेण, मन्त्रान्तरमार्गणावश्यकताव्यव-

च्छेदः, विषस्याप्यौषध्यङ्गत्वसम्भवात्, **नञ्पूर्वः** - प्रतिपदं प्राक्तनभागव्यवस्थित-नकारालङ्कृतः, 'नाहं न मम' इत्याकारक इति भावः, **प्रतिमन्त्रः** - मल्लप्रतिमल्ल-न्यायेन मोहमन्त्रसामर्थ्यसमापनसमर्था बलवत्तरा पाठपद्धतिः, **अपि**, न केवलं मोहमन्त्रस्यैव सत्ता, अपि तु तत्प्रतिमन्त्र-स्यापि, रोगभावस्यैव तदौषधसद्भावज्ञा-पकत्वात्, पितृपुत्रसम्बन्धवन्मिथः सापेक्ष-त्वात्तद्भावयोरिति हृदयम्। प्रतीपतामेव मन्त्रस्यास्य स्पष्टयति- **मोहजित्** -मोह-विजयविधावमोघशस्त्रम्। अस्तीति गम्यते,

मोहस्य तद्विजेतुश्च त्रैकालिकत्वात्।

अथ नैष मोहप्रतिमन्त्रः, अपि तु मोहान्तरम्, अहन्त्वप्रतीतेः सार्वजनिकत्वात् प्रमाणसिद्धत्वाच्च। किञ्चात्मभावसिद्धिविधौ स्वतन्त्रे तन्त्रान्तरेषु च बहुश इदमेवोपन्यस्यते साधनतया स्वसंवेदनमहन्त्वप्रतीतिलक्षणम्। एवञ्च तदपलाप आत्मापलापः, ततोऽपि नास्तिकमतानुप्रवेशः। न चेष्टापत्तिः, मोहापनयनप्रयासस्य तद्विवृद्धिपर्यवसानात्। ततश्च - विनायकं प्रकुर्वाणो रचयामास वानरम् - इति न्यायापातः।

॥ ५ ॥

किञ्चैवं शून्यवादोरीकारः, ज्ञातृज्ञेयोभयप्रतिषेधस्य तन्नान्तरीयकत्वात्। ततश्च कस्य मोहः किंविषयश्चासाविति वक्तव्यम्। एवञ्च सर्वोऽप्ययं शास्त्ररचनाऽऽयासो वन्ध्यापुत्रोद्वाहप्रबन्धप्रयाससोदरायत इति चेत् ?

मैवम्, तात्पर्यापरिज्ञानात्। नैतेन प्रतिमन्त्रेण स्वसंवेदनं प्रतिषिध्यते, अपि त्वन्याश्रयं स्वसंवेदनम्, तस्य मोहात्मकत्वात्। एवं स्वकीयसंवेदनमाश्रित्याप्यूह्यम्। एतदेव स्पष्टतरमाह-

**शुद्धात्मद्रव्यमेवाहं शुद्धं**
**ज्ञानं गुणो मम।**
**नान्योऽहं न ममान्ये चे-**
**त्यदो मोहास्त्रमुल्बणम्॥२॥**

**अहमिति** विवादापन्नमुद्देश्यमभिधाय विधेयमाह- **शुद्धम्** - विजातीयलेशेनाप्यकलङ्कितम्, अतति तांस्तान् परिविमलान् ज्ञानादिपर्यायान् गच्छतीत्य**ात्मा** तदेव **द्रव्यम्** - वस्तुसन् पदार्थः, न तु शशशृङ्गादिवत् परकल्पितमिति भावः, **एव**कारेण पृथिव्यादिद्रव्यान्तरान्तर्भावो व्यवच्छिन्न आत्मद्रव्यस्य। तथात्वेऽपि तत्परि-

कल्पितत्वानपायात्।

न च भूतपञ्चकात्मकतयाऽऽत्मनो न द्रव्यान्तररूपतैवेति वाच्यम्, वैधर्म्योपलब्धेस्तद्भेदसिद्धेः। तन्नियामकत्वात्तस्य, तथा चावदामः, वैधर्म्यं यत्र तद् भिन्नं पृथिव्या गगनं यथा। ज्ञस्वभावोऽज्ञकादस्माद् भिन्नोऽस्मि पुद्गलादहम्॥ **शमोपनिषद्॥**

यदि तु वैधर्म्योपलब्धावपि नाङ्गीक्रियते भेदः, तदा विश्वस्यापि विश्वस्यैकत्वप्रसङ्गः, भेदनिमित्तान्तरविरहात्।

वैधर्म्यं च क्षित्यादेरात्मनः, तस्याज्ञत्वात्, आत्मनश्च ज्ञानगुणत्वात्। उदाह चान्यत्रायमेवोपाध्यायोत्तमः - पुद्गलानां गुणो मूर्त्ति - रात्मा ज्ञानगुणः पुनः। तद् भिन्नं पुद्गलद्रव्या - दात्मद्रव्यं जगुर्जिनाः॥ धर्मस्य गतिहेतुत्व - गुणो ज्ञानगुणोऽसुमान्। धर्मास्तिकायात्तद् भिन्न - मात्मद्रव्यं जगुर्जिनाः॥ अधर्मः स्थितिहेतुत्वगुणो ज्ञानगुणोऽसुमान्। अतोऽधर्मास्तिकायान्य - मात्मद्रव्यं जगुर्जिनाः॥ अवगाहो गुणो व्योम्नो, ज्ञानं खल्वात्मनो गुणः। व्योमास्तिकायात्तद् भिन्न - मात्मद्रव्यं

जगुर्जिनाः ॥ वर्त्तनालक्षणः कालो, जीवस्तु ज्ञानलक्षणः। तद् भिन्नं समयद्रव्या-दात्म-द्रव्यं जगुर्जिनाः॥ आत्मनस्तदजीवेभ्यो विभिन्नत्वं व्यवस्थितम्॥ **अध्यात्मसारः॥**

ननु च सिद्धेऽप्यात्मनो विभिन्नत्वे दूरपह्नवं तस्य भूतसंवलितत्वम्, संसारिण-स्तस्य तद्भावस्य सिद्धान्तसिद्धत्वादिति चेत् ? को वा किमाह ? किन्तु न तत्तत्त्वं तच्छुद्धत्वबाधकम्, शुद्धभावसमवायस्यैव मिश्रभावसाधकत्वात्। पयस्तन्दूलादिप्रत्ये-कशुद्धद्रव्यसमुदायेनैव परमान्ननिष्पत्तिदर्श-नात्। तत्रापि यथा न परमान्नमेव तन्दूलम्,

पयो वेत्यत्रापि दृष्टव्यम्। यथा न भूतव्यामिश्र एव जीवः, पुद्गलरूप एव वाऽऽत्मेति। न हि व्यामिश्रत्वेन शुद्धत्वापाकृतिर्द्रव्यान्तरभावापादनेन स्वभावोच्छेदो वा, त्रिकालेऽपि तदसम्भवात्, परमार्थतः प्रत्येकप्रदेशस्य स्वविजातीयादत्यन्तमतिरिक्ततया मिश्रभावस्यैवाभावाच्च। इत्थञ्च स्थितमिदम् - शुद्धात्मद्रव्यमेवाऽहम्, नाशुद्धोऽहम्, नाप्यनात्मद्रव्यमिति।

एतेनापाकृतमशुद्धद्रव्यतयाऽऽत्मनः सत्त्वम्, समर्थितश्च प्रतिमन्त्रप्रथमांशः-

नाहम् - इति।

किञ्च दर्पविकारतयोदेति प्रायः संवेदनम्- अहमिति। दर्पश्च जात्यादिकं विशिष्टमवलम्ब्य प्रवर्त्तते। तच्च नात्म-सम्बन्धि, देहाश्रितत्वात्। ततश्चान्याश्रित-भावाश्रयं संवेदनं कथमात्मविषयतया सङ्गतिमङ्गतीति मोहमन्त्रत्वेनैव पर्यव-स्यति- अहम् - इति। एतत्प्रतीतेश्च परमार्थतोऽज्ञानतया न मोहान्तरम्, अपि तु ज्ञानविशेष एव तत्प्रतिमन्त्रः- नाऽहम् - इति।

अतत्तत्त्वाभिनिवेशो मोहः, तदात्मक-

तयाऽहमितिसंवेदनस्य मोहमन्त्ररूपता, तदभिनिवेशापाकरणस्य च मोहापासनानतिरिक्ततया मोहजित्त्वेन प्रतिमन्त्रतेत्यत्र निष्कर्षः।

अंशान्तरमधिकृत्याऽऽह- **शुद्धम्** - अशेषव्यामोहविशेषव्यतिरिक्ततया परिनिर्मलम्, **ज्ञानम्** - निःशेषज्ञेयज्ञप्तिकरणप्रवण आत्मस्वभावः, **मम** - शुद्धात्मद्रव्यमात्रस्य, **गुणः** - कथञ्चित्स्वानतिरिक्तत्वेन स्वपर्यायः, वर्णादिगुणान्तराणां द्रव्यान्तराऽऽश्रितत्वात्। एतेन परमार्थतो यन्ममकारगोचरीकर्तुमर्हं तदावेदितम्।

॥ १३ ॥

नन्वेवं 'न ममे' - ति प्रतिमन्त्रांशः प्लवत इति चेत् ? न, काञ्चनकामिन्यादि-विषयकस्वसम्बन्धित्वप्रतिषेध एव तत्ता-त्पर्यभावात्, संयोगमात्रत्वात्तेषामात्मनोऽ-द्वितीयत्वात्। तथा चागमः -

एगो हं णत्थि मे कोइ णाहमण्णस्स कस्सइ।
एवमदीणमणसो अप्पाणमणुसासइ॥
एगो मे सासओ अप्पा णाणदंसणसंजुओ।
सेसा मे बाहिरा भावा सव्वे संजोगलक्खणा॥

- इति। न चैवं ज्ञानस्यापि स्वकीय-त्वनिरासः, नो चेत्तदा न ममेत्यनुपपत्तिरिति वाच्यम्, पारमार्थिकममकारस्येष्टतया तस्य

प्रतिषेधविषयत्वविरहात्, पारमार्थिकाहम्प्रत्ययवत्। अपि चास्त्वेकान्ततोऽपि स्वकीयत्वविरहः, नयान्तराश्रयेण ज्ञानस्यापि स्वस्मिन्नेव पर्यवसानादतिरिक्तत्वाभावात्, अन्वाह च- आदा हु मज्झ णाणे - इति। अन्यत्रापि-आत्मैव दर्शनज्ञान-चारित्राण्यथवा यतेः। यत्तदात्मक एवैष, शरीरमधितिष्ठति - इति॥ **योगशास्त्रम्**॥

अथास्त्वतिरिक्तमितरं वा ज्ञानमात्मगुणः, शुद्धमिति त्वतिरिच्यते, व्यवच्छेद्यविरहात्, पुद्गलादेरशुद्धज्ञानगुणत्वाभावादिति चेत् ? न, अभिप्रायापरिज्ञानात्,

न ह्यत्र पुद्गलव्यवच्छेदार्थं शुद्धत्वविशिष्टं ज्ञानमुपादत्तम्, अपि तु विवक्षितस्वामि-सम्बन्ध्युपादानार्थम्। अयमाशयः- शुद्धा-त्मद्रव्यमेवाहमिति पूर्ववाक्याच्छुद्धात्मैवा-ऽत्र स्वामितयाऽभिप्रेतः। तद्गुणश्च शुद्धमेव ज्ञानं सम्भवति, नाशुद्धम्। मोहसंवलि-ततया तस्य तत्त्वतो ज्ञानरूपत्वस्यैवा-भावात्, स्वभावानुपलब्धे, उक्तश्च-मोहेन संवृतं ज्ञानं, स्वभावं लभते न हि। मत्तः पुमान् पदार्थानां, यथा मदनकोद्रवैः इति।। इष्टोपदेशः।।

किञ्च रागाद्यशुद्धिसामानाधिकरण्यमेव न भवति ज्ञानस्य, तिग्मरुचेस्तमःसामानाधिकरण्यवत्, अभिहितं चाभियुक्तैः- तज्ज्ञानमेव न भवति, यद्भावे विभाति रागादिगणः। तमसः कुतोऽस्ति शक्ति - र्दिनकरकिरणाग्रत स्थातुम् ? इति।

अपि चाशुद्धं तु ज्ञानं निगोदजीवानामपि भवत्येव. अन्यथा तदजीवत्वप्रसक्तेः, यथोक्तम् - सव्वजीवाण वि अक्खरस्स अणंतभो भागो णिच्चुग्घाडिओ। जइ पुण सो वि आवरेज्जा, तो जीवो अजीवत्तं पावेज्जा - इति। इदमत्र हृदयम्-

यथा घनेऽपि घनाघने सूर्यादिप्रभा भवति, यया ज्ञायेत दिनादिविवेकः, यथाऽऽह-सुट्ठु वि मेहसमुदए होइ पहा चंदसूराणं - इति। एवमात्मनोऽप्यक्षरानन्ततमो भागस्त्वनुद्घाटित एवाऽऽस्ते निगोदगतस्यापि। अशुद्धश्चासौ ज्ञानांशः, निगोदजीवत्वाद्युपाधिकलङ्कितश्च। शुद्धात्मा तु निरुपाधिरति कथमशुद्धं ज्ञानं तद्गुणः सम्भवति ?

किञ्चान्यत्, न तत्त्वतो ज्ञानव्यपदेशार्हमपि तद् यदशुद्धम्। स्वजन्याजनकतया विफलत्वेन परमार्थतोऽसत्त्वात्। विरतिर्हि ज्ञानजन्या, ज्ञानस्य फलं विरतिः-इत्युक्तेः।

॥ १८ ॥

तां तत्त्वतोऽजनयन्नवपूर्वश्रुतमप्यभव्यस्या-
ज्ञानमेवेति का वार्त्तेतरस्य ? ततश्च
पर्यवसितमिदम्-शुद्धं ज्ञानं गुणो मम- इति।
व्यनक्त्येतदेव व्यतिरेकेण - **अहम्** -
शुद्धात्मद्रव्यतया प्रमाणितः, **अन्यः** -
पुद्गलादिरूपो, **न** - नैवास्मि, तद्रूपत्वे
मदहन्त्वस्यैवानुपपत्तेः, व्याहतेः, यद्यहम्,
कथमन्यः ? यदि चान्यः कथमहमिति।
एतेन प्रत्युक्तो मोहमन्त्राऽऽद्यांशः। अपर-
मपि प्रतिवक्ति- **मम** -सर्वसंयोगव्यतीत-
स्वभावस्य शुद्धात्मद्रव्यस्य, **अन्ये** - धन-
स्वजनादिसंयोगाः, **न** - नैव सम्भवन्ति,

सम्बन्धविरहान् ममेति व्यपदेशस्यैवानुपपत्तेः। अन्यथा त्वतिप्रसङ्गः। विश्वस्यापि विश्वसम्बन्धित्वप्रसक्तेः, असम्बन्धित्वाविशेषात्, तुल्यन्यायात्। नो चेत्, तदा प्रकृतेऽपि माऽस्तु, अत एव।

इतश्च मदीयवस्त्वभावः, मत्परिग्रहासम्भवात्, तात्त्विकपरिग्रहस्य ताद्रूप्यपरिणतिरूपत्वात्, तस्य च धनादावसम्भवात्, पौद्गलिकत्वाद्धनादेः, ज्ञातृमात्रत्वाच्च मम, तदाह-मज्झ परिग्गहो जदि तो हं अजीवत्तं तु गच्छेज्जा। णादेव अहं जम्हा तम्हा ण परिग्गहो मज्झ - इति॥ **समयसारः॥**

किञ्च व्यवहारेणापि तत्रैव मदीयत्व-व्याहृतिः, यत्र मदाधिपत्यम्। तच्च नास्ति कुत्रापि धनादौ वस्तुतः, रिप्वादिसाधारण-त्वात्तस्य, अन्वाह च - यानि द्विषामप्युप-कारकाणि सर्पोन्दुरादिष्वपि यैर्गतिश्च। शक्याश्च नापन्मरणामयाद्या हन्तुं धनेष्वेषु क एव मोहः ?- इति॥ **अध्यात्मकल्पद्रुमः॥**

अपि च स एव लोकेऽपि स्वीयतया व्यवह्रियते, यो भवत्यात्मनो हितः, तथा-विधस्तु नास्ति कोऽपि संयोगः, दुःखैक-हेतुत्वात्तस्य, यदागमः- संजोगमूला जीवेण पत्ता दुक्खपरंपरा - इति। अन्वाह-दुःख-

संयोगभागित्वं संयोगादिह देहिनाम् - इति॥ **इष्टोपदेशः**॥ तदत्र कः स्वीयः ? पीडाप्रदातुः परकीयत्व एव पर्यवसानात्।

ननु मा भूच्चौरादिसाधारणतया धनस्य स्वकीयत्वम्, कलत्रस्य तु तदस्तु, अर्धाङ्गनाभूतत्वात्तस्या इति चेत् ? न, अधिकसाधारणत्वात्, अतिचञ्चलत्वात्, परमार्थतो रिप्वधिकत्वाच्च, अभिहितं च-
दर्शने हरते चित्तं स्पर्शने हरते बलम्।
सङ्गमे हरते वीर्यं, नारी प्रत्यक्षराक्षसी - इति। अपि च-नितम्बिन्यः पतिं पुत्रं पितरं भ्रातरं क्षणात्। पातयन्ति ह्यकार्येऽपि दुर्वृत्ता

प्राणसंशये- ति॥ **योगशास्त्रम्॥**

न हि शत्रवोऽपि कुर्वन्ति तदपकृत्यं यत्साहसाधिका भार्येति कथन्न परकीयैव सा ? अपि चैतदेव दुरुद्धरं शल्यम्, येन यावज्जीवमनुभवति पुरुषो मर्मवेधाधिका व्यथाः, अत एवोक्तम् - तम्हा उ वज्जए इत्थीं विसलित्तं कंटगं व णच्चा-इति। प्रसिद्धं च स्त्रियास्तत्त्वं नुपूरपण्डितादिज्ञात इत्यलं प्रसङ्गेन।

अथ माऽस्तु कलत्रस्य स्वकीयत्वम्, मातापित्रोस्तु तत् स्तात्, एकान्तवत्सल-

त्वादिति चेत् ? न, चुलनीप्रभृतिभिरनेकान्तोपलम्भात्, भवस्वभावो ह्ययं प्रकृतिवक्रः, यो विकारवशतां नयति सत्त्वेनाभिमतानपि सम्बन्धान्, माताऽपि जायते रिपुः, पिताऽप्यभ्यमित्रः, बन्धुरपि वधेच्छुः, स्वसाऽपि सर्पिणी, पुत्र्यपि पीडैकप्रसूः पुत्रोऽपि प्रलयोपमः, मित्रमप्यमित्रः। स्वस्वार्थमात्रस्वजनः सर्वोऽपि जनः, कोऽत्र कस्य वल्लभः ? कश्च कस्य स्वजन इति दृष्टव्यं विवेकदृशा।

किञ्च रागिणोऽपि न समर्थाः स्वजना मोचयितुमन्योऽन्यं भवदुःखबन्धनात्। न

प्रत्यला चातुरन्तसंसारकान्तारे त्राणं शरणं वा भवितुम्। अत एवोच्यते-त्रातुं न शक्या भवदुःखतो ये, त्वया न ये त्वामपि पातुमीशाः। ममत्वमेतेषु दधन् मुधाऽऽत्मन्! पदे पदे किं शुचमेषि मूढः - इति॥

**अध्यात्मकल्पद्रुमः॥**

यदि रागातिशयेनाऽऽजीवनमपि न कुर्वन्ति मिथः शत्रुभावम्, तदापि मिथोऽपकुर्वन्त्येव शत्रुवत्, तथारागविजृम्भितस्वाभाव्यात्, उदाहरणमत्र ब्रह्मदत्तचक्री तत्स्त्रीरत्नं कुरुमती च, यौ गतौ सप्तमीं षष्ठीं च नरकक्षितिम्। उक्तश्चात एव-मूढात्मा यत्र

विश्वस्तस्ततो नान्यद् भयास्पदम्। यतो भीतस्ततो नान्य-दभयं स्थानमात्मनः- इति (समाधितन्त्रम्)। प्रियोऽपि सम्बन्धः सम्पादत्यात्मनोऽप्रियतरमेवेत्यत्र निष्कर्षः, साक्षादपि शोकहेतुत्वात्तस्य, अन्वाह च- सम्बन्धान् कुरुते जन्तु-र्यावत आत्मनः प्रियान्। तावन्तस्तस्य जायन्ते हृदये शोकशङ्कवः - इति।

तदेवं स्थिते सूक्तमिदम्-न ममाऽन्ये चेति। नन्वेवं देव-गुरु-धर्मस्यापि परकीय-त्वापत्तिरिति चेत् ? सेयमिष्टापत्तिरेव शुद्ध-नयस्य। तदितराभिप्रायतस्तु यत्स्वकीयं

ज्ञानादि, तद्धेतुतया देवादेरपि स्वकीयत्वम्, लोकेऽपि सिद्धमिदम्, यथा-दासेण मे खरः क्रीतो दासो मम खरोऽपि मे - इति। प्रतिपत्तव्या चेयं स्वकीयता, एवमेव परमार्थस्वकीयस्वायत्तभावसम्पत्तेः। न चौपचारिकत्वेनानादेयमिदं स्वकीयत्वमिति वाच्यम्, तथात्वेऽपि सम्यक्त्वात्, अत एवागमः - अरिहंतो मह देवो जावज्जीवं सुसाहुणो गुरुणो। जिणपन्नत्तं तत्तं इअ सम्मत्तं मए गहियं- इति।

सर्वथाऽप्युपचारानाश्रयणे तु सर्व-लोकव्यवहारानुपपत्तिरेवेति निभालनीयं

निपुणधिया। भवति ह्युपेयसाधनत्व उपायस्यापि तत्त्वम्, अन्यथा तूपेयस्यापि तद्भावविगमः, उपेतुमशक्यत्वात्।

इत्थञ्च समर्थ्य प्रतिमन्त्रं निगमनमाह- **इत्यदः** - नान्योऽहं न ममान्ये च - इत्यनन्तरोदिताऽऽकारकम्, **उल्बणम्**- एकान्तिकाऽऽत्यन्तिकमोहोच्छेदसाधनत्वेनोग्रतमम्, **मोहास्त्रम्** - शौर्यातिशयावधीरितसदेवासुरमानवेन्द्रमोहराजगर्वपानप्रवणप्रहरणम्। भवति ह्येतत्प्रतिमन्त्रसाधक एतेनोल्बणेनास्त्रेण मोहोन्मूलनविधातेति न किञ्चिदनुपपन्नम्। भावनीयमतोऽभीक्ष्णं

मोहनिरासरसिकेन - नाहं न ममेति। अपाकर्त्तव्यः शरीराद्यालम्बनोऽहङ्कारो ममकारश्च, एवमेवामोहभावभावितता-योगात्, इतरभाववियोगसम्पादनाच्चेति भावः। एतदेव स्पष्टतरमाचष्टे-

**यो न मुह्यति लग्नेषु**
**भावेष्वौदयिकादिषु।**
**आकाशमिव पङ्केन**
**नासौ पापेन लिप्यते॥३॥**

**यः** - अनन्तराभिहितमोहप्रतिमन्त्र-भावनाभावितान्तरात्मतयाऽशेषतोऽपनीत-

मोहविकारः पुनिताऽऽत्मा, **लग्नेषु** - अद्यापि भवस्थतयोदयादिप्राप्तकर्मवशात् कथञ्चित् सम्बन्धप्राप्तेषु, **औदयिकादिषु** - कर्मोदयादिनिर्वर्तितेषु, आदिना क्षायोपशमिकादिप्रग्रहः, **भावेषु** - सुकुलत्वादिपदार्थेषु, **न** - नैव **मुह्यति** - मदीया एते भावा इत्याकारकमज्ञानमुपैति, अभिहितप्रतिमन्त्रप्रतिकृतमोहसामर्थ्यत्वात् परभावेषु परिकल्पनामात्रदर्शित्वात्तस्य, यथा-एक एव भगवानयमात्मा ज्ञानदर्शनतरङ्गसरङ्गः। सर्वमन्यदुपकल्पितमेतद् व्याकुलीकरणमेव ममत्वम् - इति॥

॥ ३० ॥

**असौ** - स्वपरभावविवेकसम्पन्नः, **पापेन** - साम्परायिककर्मबन्धेन, न - नैव **लिप्यते** - संश्लिष्यते, तद्योगयोग्यताविकलत्वात् तस्य। अज्ञानं हि मोहविलासरूपं पापोपलेपनिबन्धनम्, तद्रहितस्य तु कस्तदुपलेपावकाश इति। अत्र दृष्टान्तमाह- **पङ्केन** सार्द्रमृत्तिकारूपेण कर्दमेन, **आकाशमिव** - गगनमिव। यथाऽऽकाशं न लिप्यते पङ्केन तथाऽसावपि पापेनेति भावः। हेतुस्तूभयत्रापि स एव तद्योगयोग्यताविरहलक्षणः।

॥ ३१ ॥

अज्ञानमेव पापोपलेपयोग्यताश्रयः, यदा हि तस्यैवाभावः, तदा कुत्र तिष्ठत्वनाश्रयं पापम् ? न चैवं पापसाध्वसापगमादपगतसम्मोहस्य स्वच्छन्दमसत्प्रवृत्तिस्स्यादिति वाच्यम्, असत्प्रवृत्तेरेव सम्मोहलक्ष्मतयाऽसम्मोहस्य तदसम्भवात्। कथन्नाम नरकं नारीति जानानोऽमूढस्तस्यां प्रवर्त्तेत ? मृत्युः षट्कायवध इत्यवगन्ता तद्विराधनायाम् ? अर्थोऽनर्थ इति वेत्ता च चौर्यादौ ? यदि च प्रवर्त्तेत, तदा नासौ ज्ञानी, निबिडमोहविकारविहितनिकारत्वेन सम्मूढतमत्वात्तस्य।

॥ ३२ ॥

एतेन - यस्य बुद्धिर्न लिप्यते हत्वा सर्वमिदं जगत्। आकाशमिव पङ्केन नासौ पापेन लिप्यते - इति परोक्तं प्रतिक्षिप्तम्, तथाविधनिर्लेपबुद्धेः सर्वजगद्धतिलक्षणा-समञ्जसकर्तृत्वस्यैवानुपपत्तेः, तत्कर्तुश्च तादृशबुद्धित्वस्य।

नन्वेवं गतं तुर्येण गुणस्थानेन, तत्र ज्ञानभावेऽपि विरत्यभावोपगमादिति चेत् ? को वा किमाह ? गतमेव शुद्धनयनीत्या, तदभिप्रायेण ज्ञानविरत्योरनर्थान्तरत्वात्। नैतत् स्वमनीषिकयैवोच्यते, उपनिबन्धन-मप्यस्याऽऽर्षम् - जं सम्मं ति पासहा, तं

मोणं ति पासहा। जं मोणं ति पासहा तं सम्मं ति पासहा - इति।। **आचाराङ्गम्।।**

इतरनयाभिप्रायेणापि भवति सज्ज्ञानिनो यथाशक्ति सत्प्रवृत्तिर्नियोगतः, अन्यत्राशिथिलचरणमोहोदयात्। तथा चाहुराचार्याः - अत एवाऽऽगमज्ञस्य या क्रिया सा क्रियोच्यते। आगमज्ञोऽपि यस्तस्यां यथाशक्ति प्रवर्तते - इति।। **शास्त्रवार्त्तासमुच्चयः।।**

नन्वेवं - तत्त्वज्ञानान्निःश्रेयसम् - इति तन्त्रान्तरीयसिद्धान्तवचसः का गतिरिति चेत् ? दुर्गतिरेवैकान्तवादाश्रय इति गृहाण।

स्याद्वादे तु तात्त्विकज्ञानस्य सक्रियत्वोपगमेनोक्तवचसः - ज्ञानक्रियाभ्यां मोक्षः- इति स्वतन्त्रसिद्धान्तसमवतारयोगान्न काऽप्यनुपपत्तिरिति ध्येयम्।

अथ लग्नताऽसम्मोहता चेति पूर्वापरव्याहतम्, तथाविधौदयिकादिभावानां मोहजननस्वाभाव्यादिति चेत् ? न, तथातत्स्वरूपसामर्थ्यविरहात्, अन्वयव्यतिरेकोभयानेकान्तोपलम्भात्, तथा चार्षम् - चयइ जह चक्कवट्टी पवित्थरं तत्तियं मुहुत्तेण। ण चयइ तहा अहन्नो दुब्बुद्धी खप्परं दमओ - इति॥ उपदेशमाला॥ यदि

त्वौदयिकभावो नियोगतो मोहजनक-स्स्यात्, तदा चक्र्यादेः स्वातिशयित-र्द्धित्यागो दुःशक एव स्यात्, स्याच्च द्रमकादेर्नीरागप्रायत्वम्, न चैवमस्तीति सम्भवत्यौदयिकभावसद्भावेऽपि निर्मो-हत्वम्, साक्षित्वसमाश्रयात्। एतदेव व्यक्तं व्याचष्टे-

**पश्यन्नेव परद्रव्य-**
**नाटकं प्रतिपाटकम्।**
**भवचक्रपुरस्थोऽपि,**
**नामूढः परिखिद्यति ॥४॥**

**प्रतिपाटकम्** - कषायचौरबहुलस्य

विषयधूर्तसङ्कुलस्य सम्मोहसम्राडधिष्ठितस्य रागद्वेषयुवराडुपप्लुतस्य कर्मसेनासंविधीयमाननित्यडमरडम्बरस्य नित्यजाज्वल्यमानकामानलदन्दह्यमानपौरस्य संसारपुरस्य पाटके पाटके **परम्** -आत्मापेक्षयाऽत्यन्तं विजातीयम्, **द्रव्यम्** -पुद्गलाभिधम्, तस्य नाटकम् - नटस्यापरापररूपपरावर्त्तसङ्काशमपरापरपर्यायपरिणतिलक्षणं नाट्यविधानम्, **पश्यन्नैव** - संवीक्षमाणमात्रः, एवकारेण साक्षिभावप्रकर्षपरिणत्याऽन्तर्भावव्यवच्छेदोऽस्य भवतीत्यावेदितम्। यथा हि नाटकमभि-

वीक्षमाणस्तत्तत्परिवारं तत्तत्सुखदुःख-निमित्तं तत्तद्धर्षशोकादिविक्रियां तत्तत्क-षायताण्डवं च नेत्रपात्रातिथिं कुर्वाणोऽपि न कुत्रापि लिप्यति, नापि मदीयमेतदिति संविदन् तत्तद्धर्षादिसंवेदनामनुभवति, सा-क्षिभावसमनुभवात्। एवं परद्रव्यनाटकनि-भालनपरमेनमप्यधिकृत्य दृष्टव्यमिति हृदयम्।

**भवः** - सततमपि सम्भवद्दुःखशत-सहस्रकोटिसङ्कुलः संसारः, तस्य **चक्रम्** - चतुरशीतियोनिलक्षबम्भ्रमणनिबन्धनं परिमण्डलम्, तदेव **पुरम्** - अनन्तरा-

भिहितदुर्गुणमयं नगरम्, तस्मिन् **तिष्ठति** - भवोपग्राहिकर्मानुभावेनाद्याप्यसञ्जातमोक्षतया प्रागुक्तसाक्षिभावावलम्बनेनास्तित्वमात्रं बिभर्त्ति - इति **भवचक्रपुरस्थः** एवंविधो-**ऽपि**, न केवलं सिद्धिसौधाध्यारूढतया संसारातीत इत्यपि - शब्दार्थः। **अमूढः** - आत्मानात्मभावविवेकपरिपूतमतिः, **न परिखिद्यति** - नैव शोकलेशमप्युपयाति, मदीयत्वसंवित्तिरेव परिखेदावन्ध्यनिबन्धनम्, यदा तु सैवापगताऽमोहभावानुभावेन, तदा कः खल्ववकाशः परिखेदस्येति। साक्षिभाव एव सुखसर्वस्वोरीकारः, अन्त-

र्भाव एव दुःखदवानलोद्भवमुर्मुरः, अतः साक्षिभावमात्रे यतितव्यम्। एवमेव नाटक-प्रेक्षकाधिकसुखोदयसम्भवात्।

अथ दुःखनिमित्तं नोत्पादयति दुःख-ममूढस्येति व्याहतम्। तथात्वे दुःखनिमि-त्तत्वस्यैवास्यानुपपत्तेः। न चेष्टापत्तिः, तस्य दुःखनिमित्तातिरिक्तत्वेऽमूढस्य वैशिष्ट्य-विरहात्, मूढस्याप्यदुःखनिमित्तेन दुःखानु-त्पादनात्। न च दुःखस्य निमित्तमेवेदं नोत्पादयति दुःखममूढस्येत्युच्यत इति वाच्यम्, व्याहतिध्रौव्यात्। नापि परं प्रति दुःखनिमित्तमेवामूढं प्रति मोघमुपजायत

इति वाच्यम्, एवं हि सुखनिमित्तमेव नोत्पादयति दुःखममूढस्येत्यापतितम्, तथा च मूढेतरविशेषविलयतादवस्थ्यम्। इत्थञ्च सर्वथाऽपि विसंस्थुलतया स्थितमिदं वृत्तमिति।

मैवम्, परद्रव्यनाटकमेव यत् स्वरूपतः सुखाद्यनिमित्तमपि मूढस्य तन्निमित्तं भवति, तदमूढस्य साक्षिभावमात्रावलम्बनेनाकिञ्चित्करं स्यादित्यभिप्रायात्। पश्यत्यसावमूढो यथा मोहोन्मादविलसितमेवेदं येनास्थानहसनरुदनादिविडम्बनाः प्राप्नुवन्ति प्राणिनः। अनूदितं च - हसन्ति

क्रीडन्ति क्षणमथ च खिद्यन्ति बहुधा,
रुदन्ति क्रन्दन्ति क्षणमथ विवादं विदधते।
पलायन्ते मोदं दधति परिनृत्यन्ति विवशा,
भवे मोहोन्मादं कमपि तनुभाजः परिगताः
इति।। **अध्यात्मसारः।।**

तदस्यामोहभावानुभावेन यत्किञ्चिदपि परद्रव्यनाटकं दृश्यमानं न विक्रियाकरं स्यात्। युवपुत्रमरणमपि पश्यत्यसौ माध्य-स्थ्यमास्थाय। धनकोट्यपहरणमपि न प्रभवत्यस्य व्यथाव्युत्पादनाय। सकामका-मिनीप्रक्रमोऽपि न प्रत्यलो भवत्यस्य कामोत्पादनाय। प्रबलपरीषहप्रपातोऽपि

नालं भवत्यस्य साध्वसप्रसवाय। मरणान्तोपसर्गोपनिपातोऽप्यफलो भवत्यस्य रोमोद्गममात्रमपि प्रतीत्य। सफलीभवन्त्यस्यामुपनिषद्गिरः - कल्पान्तपवना वान्तु यान्तु चैकत्वमर्णवाः। तपन्तु द्वादशादित्या नास्ति निर्मनसः क्षतिः - इति।

मोह एव मोहयति जीवम्, येनासावन्तर्भवति परद्रव्यनाटके। पश्यति तत् स्वसम्बन्धितया। ततश्च गोचरीभवति तत्तद्धर्षशोकाद्युन्मादस्य। स्वकीयत्वदर्शनमेवाखिलमोहोन्मादबीजम्। तदस्यौषधं

दर्शनमात्रम्, यदत्राभिहितं 'पश्यन्नेवे'ति पदेन। यथावस्थिततत्त्वदर्शनमेव बीजं सौस्थ्यस्य, इतरं च दुःस्थितेरिति तात्पर्यम्।

ननु सम्भवति नाटकप्रेक्षकस्य साक्षिभावः, नटसम्बन्धित्वाभावात्तस्य, न तु वास्तवपित्रादेः, दुर्मोच्यत्वात्पुत्रादिस्नेहस्येति चेत् ? कोऽत्र वास्तवपितेति वक्तव्यम्, प्रायः सर्वोऽपि गृहस्थ इति चेत् ? न, नाटकपितुरनतिरिक्तत्वात्तस्य, एतदेव हि तत्पितुर्नाटकीयत्वम्, यत्तस्याल्पकालीनत्वम्, तच्च यदि वास्तवत्वेनाभिमतेऽपि पितरि साधारणम्, तदा कोऽस्य

नाटकपितुर्विशेषः ? तत्तत्पुत्रप्रेमप्रदर्शनादि-चेष्टायास्तूभयत्र तुल्यत्वान्न कोऽपि विशेष इति हृदयम्। वास्तवपित्रादिस्तु स स्यात्, यः शाश्वतः। स च नास्ति विश्वेऽपि विश्वे, अतो नाटकमेवेदमिति प्रतिपत्तव्यम्।

ननु च नाटकपिता मन्यतेऽन्तर्यथा नास्म्यस्याहं पिता, अपि तु नटमात्रः, नैतन्मननमितरपितुरल्पकालीनस्यापीति कथन्न तद्विशेष इति चेत् ? तदेतन्मननं तन्मोहमात्रपर्यवसायी न वास्तवपितृत्व-बीजम्, अपि तून्मादमात्रम्, अतस्त्याज्यं तत्। अपि चैतेन मननेनैवं तु प्रयात्यसौ

कल्पनातीता यातनाः, विषहत्याजीवनं दुरुद्धरमन्तः शल्यम्, न च किञ्चिदुपकरोत्यात्मनः पुत्रस्य वेति कथमेनमुन्मादं प्रमाणीकृत्य नाटकं वास्तवतयोरीक्रियमाणमुचितं स्यात् ? अपि तु भयङ्करतरमिदं नाटकम्, यत्र मुह्यमानः क्षिप्यते नरकावटे मोहराज्ञा, तदुक्तम् - मा भूरपत्यान्यवलोकमानो मुदाकुलो मोहनृपारिणा यत्। चिक्षिप्सया नारकचारकेऽसि, दृढं निबद्धो निगडैरमीभिः - इति॥ **अध्यात्मकल्पद्रुमः॥** अपि चेहभवेऽपि प्रतीतं प्रतिगृहं शल्योपमत्वं पुत्राणां समाधिशत्रुत्वं

च, अन्वाह च - आजीवितं जीव ! भवान्तरेऽपि वा, शल्यान्यपत्यानि न वेत्सि किं हृदि ? चलाचलैर्यैर्विविधार्त्ति-दानतोऽनिशं निहन्येत समाधिरात्मनः - इति ॥ **अध्यात्मकल्पद्रुमः ॥**

अतो दृष्टव्यमात्रमिदं भवनाटकम्, भावयितव्या पित्रादिवियुक्तताऽऽत्मनः, यथा न मे कश्चित्पिता, पाति रक्षतीति पितेति निरुक्तियुतस्य कस्यचिन्मत्सम्ब-न्धित्वस्यासम्भवात्, सर्वभयातीतत्वान्मम। नापि कापि मे माता, अनाद्यन्तस्य मम प्रसवस्यैवाभावात्। नापि मे कश्चिद् बन्धुः,

बध्नाति स्नेहेनेति बन्धुरिति व्युत्पत्तिव्यालिङ्गितस्य कस्यचिदखिलस्नेहोपश्लेषविमुक्तस्य मम सम्बन्धगोचरत्वस्यासम्भवात्। नापि मे काचित् पत्नी, ध्रुवस्वरूपे मयि कस्यचित् पतनप्रयोजकत्वासम्भवात्, नापि मे कश्चित् पुत्रः, पुनाति प्रसूत इति पुत्र इत्यन्वयोपेतस्य कस्यचिदाकालं पवित्रस्य मम पावित्र्यप्रेरकत्वेनासम्भवात्।

अपि च नेदं शरीरकमपि मत्सम्बन्धि, सदातनस्य मम विशरारुसम्बन्धित्वायोगात्। गृहमपि न मे किञ्चित्, स्वरूप-

मात्रप्रतिष्ठितत्वेन ममापरनिवासविरहात्।
नापि कनकादिद्रव्यमपि मदीयम्, आत्मद्रव्यातिरिक्तस्य सर्वस्यापि परकीयत्वात्।

विभावनया ह्यनया सिध्यत्यात्मनोऽचिन्त्यचिन्तामणिकल्पं दृङ्मात्रम्। सोऽयं पश्यन्नेव-पदाभिहितः साक्षिभावः सर्वसौख्यसविता। वशीभूते च तस्मिन् वश्यं स्यात्सिद्धानामिव परद्रव्यनाटकसम्प्रेक्षणमात्रम्। अतो ह्यनुभवति मुनिर्वीतरागसुखोपमं सौख्यमिह भवेऽपि। सम्भवत्येतदपि दृङ्मात्रसिद्धेरौदासीन्यानुभावात्, अन्वाह च - अदृष्टवैचित्र्यवशाज्जगज्जने

विचित्रकर्माशयवाग्वसंस्थुले। उदासवृत्ति-स्थिरचित्तवृत्तयः सुखं श्रयन्ते यतयः क्षतार्त्तयः इति॥ **अध्यात्मकल्पद्रुमः॥** एवञ्च सूक्तम्- भवचक्रपुरस्थोऽपि नामूढः परि-खिद्यति - इति।

एतेन - मूढः परिखिद्यति- इत्यप्या-वेदितम्। स ह्यस्थानान्तर्भावलक्षणां दुर्वि-दग्धतामवलम्बमानः प्रयाति कोपाटोपवि-डम्बनाः। गच्छति मानापमान-मननवि-क्रियाः। संवेत्ति वञ्चनाविचक्षणतामात्मनः। गोचरीभवति लोभसङ्क्षोभस्यानारतम्। काम्यत्येवाकमनीयम्। स एष सर्वोऽपि

मोहस्यैवापराधः। अतो रक्ष्य आत्मा ततः। दूर एव भाव्यमात्मार्थिभिर्मोहोदयनिमित्तात्। एवमेव सङ्गतिमङ्गति तीर्थकृतामपि गृहत्यागः। न हि निमित्तपरिहारमन्तरेण नैमित्तिकवर्जनमिति दर्शितो राजमार्गोऽनेनाध्वना जिनैरपि। अतोऽनुगम्यः सः।

ननु च मोहत्यागमात्रेणैव समीहितसिद्धेरयुक्तोऽयं गृहत्यागः। गृहस्थस्याप्युक्तविभावनया पित्राद्यसम्बन्धित्वप्रतीतियोगात्साक्षिभावसम्पत्तेः, त्यक्तगृहस्याप्येतद्विभावनवियुतस्य तद-

सम्पत्तेश्च, यदुक्तम् - वनेऽपि दोषाः प्रभवन्ति रागिणां, गृहेऽपि पञ्चेन्द्रियनिग्रहं तपः। अकुत्सिते वर्त्मनि यः प्रवर्त्तते, निवृत्तरागस्य गृहं तपोवनम्, - इति। अपि चैवं त्यागैकान्ताऽऽग्रहविमुक्तेः साम्यान्वयास्खलिततासिद्धिरपीति चेत् ?

न, विरागभावस्य तात्त्विकस्यावश्यं त्यागपर्यवसानात्, तदपर्यवसितस्य दम्भमात्रत्वात्। लोकेऽपि सिद्धमिदम्, यथा यता विरजति यः, तत् त्यजति सः। न त्वर्धजरतीयन्यायमवलम्बते - निन्दामि च पिबामि च - इति। यदि च पिबति, तदा

निकृतिमात्रपर्यवसायि तन्निन्दनम्। त्यागफलो हि विरागो ज्ञापयत्येव त्यागाभावे स्वाभावम्। मोहत्याग आभ्यन्तरपरिग्रहत्यागान्तर्भूतः। स च बाह्यपरिग्रहत्यागमन्तरेण न सम्भवति, अतस्तात्त्विको विरागस्त्याजयत्युभयमपि परिग्रहम्, साक्षी चात्र सिद्धान्तः - जया णिव्विंदए भोए जे दिव्वे जे य माणुसे। तया चयइ संजोगं सब्भिंतरबाहिरं - इति॥ **दशवैकालिकम्॥**

अपि च गृहापरित्याग एव ख्यापयति दुराग्रहं रागातिशयगर्भितम्, अतः

कस्तद्गोचरस्य समतालवस्पर्शोऽपीति चिन्त्यम्।

किञ्चासम्भव्येव त्यागविमुखानां विरागधारणम्, वह्नौ वल्ल्यारोपणवत्, तदाह - अकृत्वा विषयत्यागं यो वैराग्यं दिधीर्षति, अपथ्यमपरित्यज्य स रोगोच्छेदमिच्छति - इति॥ **अध्यात्मसारः॥** यः खलु स्वरसत एव प्रवर्त्तते विषयेषु तस्य तूपेत्य परद्रव्यनाटकपात्रीभवतः कः साक्षी-भावसम्भवः ? अतो यतितव्यं विषयत्यागे, अकिञ्चनभावाधीनत्वादमूढभावस्य, तथा च पारमर्षम्-दुक्खं हयं जस्स न होइ मोहो,

मोहो हओ जस्स न होइ तण्हा। तण्हा हया जस्स न होइ लोहो, लोहो हओ जस्स न किंचणाइं - इति॥ **उत्तराध्ययनम्॥**

किञ्चान्यत्, बहुमानो ह्येवं तीर्थकृदादेः, तद्यातानुयानात्। अपरेषां तु स्वमतिकल्पितमार्गयायिनां नायं सम्भवति तात्त्विकः। जिनपूजाऽप्येषां कुलटाकृतपतिसेवां स्पर्द्धते। सा च ज्ञातदोषस्य पतेर्मनोव्यथामेवोत्पादयतीति निपुणं निभालनीयम्। किञ्च जिनोपदिष्टमार्गावगणनैव ख्यापयति तेषामहङ्कारातिशयम्। अतो नैष मोहशमनपन्था:, अपि तु मोहसंवृद्धि-

सञ्चरः। प्रयतितव्यमतो जिनमार्गानुयाने, एवमेव भगवद्बहुमानः, गुणवत्पारतन्त्र्येण मोहह्रासश्च, तथा चाहुराचार्याः, न मोहोद्रिक्तताऽभावे, स्वाग्रहो जायते क्वचित्। गुणवत्पारतन्त्र्यं हि तदनुत्कर्षसाधनम् - इति॥ **अष्टकम्**॥ तदेतत्पथपथिके साकारा भवन्तीमा गिरः- भवचक्रपुरस्थोऽपि नामूढः परिखिद्यति - इति॥

अन्यथा तु स्वच्छन्दप्रवृत्तस्यानल्पविकल्पविसरकवलीकृतस्वास्थ्यस्य नान्यत् किञ्चिदवशिष्यतेऽन्यत्र मोहोन्मादात्। एतदेव व्यक्ततरं व्याचष्टे -

**विकल्पचषकैरात्मा**
**पीतमोहासवो ह्ययम्।**
**भवोच्चतालमुत्तालं**
**प्रपञ्चमधितिष्ठति ॥८॥**

**अयमात्मा** - अनन्तरोदितस्वच्छन्दमतिमथितस्वायतिर्जीवः, **विकल्पाः** मोहोन्मादोत्पादानुगुणाश्चित्तपरिणामाः, त एव चषका इव **चषकाः** - मोहमदिराभाजनानि, तैः **पीतः** - प्रत्यात्मप्रदेशं परिणतिं प्रापितः, मोह एवासवो **मोहासवः**, तत्तदुन्मादोपजननसाधर्म्यात्। पीतो मोहासवो येन सः - **पीतमोहासवः**,

हिरवधारणार्थः, स च विकल्पानां मोहोन्मादजनकत्वमवधारयति, भवत्यवश्यं विकल्पविसरेण मोहोन्माद इत्यर्थः, सद्धेतावन्वयानेकान्तायोगात्, उक्तञ्च-

नाकारणं भवेत्कार्यं नान्यकारणकारणम्।
अन्यथा न व्यवस्था स्यात् कार्यकारणयोः क्वचित् - इति ।

एवञ्चायं भव एवोच्चतालम् - मदिरापानस्थानम् - **भवोच्चतालम्**, मोहोन्मादप्रभवत्वात्, तदेवोद्गतास्ताला यस्यां तद् - **उत्तालम्**, भवति हि पानप्रवृत्तौ मिथस्तालादानादिका विक्रियाः। एतद्रूपं

प्रपञ्चम् - चतुरशीतियोनिलक्षपरिमण्डलम्, **अधितिष्ठति** - स्वयमेव स्वस्थानत्वेनोरीकुरुते।

विकल्पस्यैव सोऽपराधः, येनाधितस्थौ तन्दूलमत्स्यो सप्तमीं नरकावनिम्। विकल्पपापतो गतः सुभूमचक्री लवणाब्धितलं लोकाकाशतलं च। तदपि विकल्पस्य वृजिनं येन ब्रह्मदत्तचक्री ब्राह्मणाक्षमर्दनसम्भ्रमतो जगाम माघवतीम्। किं बभूव विकल्पान्यत्तद्येन प्रेरितो मम्मणश्रेष्ठी दुर्गतिगमनफले कर्मणि ?

विषाधिकदुर्विपाकः खलु विकल्पः।

अनलादप्यधिकसन्तापको विकल्पः, आसवाधिकोन्मादजनकश्च विकल्पः। अत सूक्तम् - विकल्पचषकैरात्मेत्यादि।

अत एव स श्रमणाचारो जिनैर्निर्दिष्टः, न यत्रावकाशोऽपि विकल्पोत्थानस्य। पञ्चप्रहरस्वाध्यायो गुर्वादिवैयावृत्यं ध्यानाभिलीनता चेत्याद्याचाराक्षणिकान्तरस्य श्रमणस्य को विकल्पप्रसरावकाश इति, तथा चार्षम्- आचाराध्ययनोक्तसद्भावनाचरणगुप्तस्य। न तदस्ति कालविवरं यत्र क्वचनाभिभवनं स्यात् - इति ॥**प्रशमरतिः**॥

अथ मनोगोचरतया विकल्पो न

बाह्याचारैः प्रतिबध्नातुं शक्यः, कपिवदत्युच्छृंखलत्वान्मनसः, प्रत्युत तस्यैव बाह्याचारप्रतिबन्धकत्वाच्च, यदुक्तम्-

चरणयोगघटान् प्रविलोठयन्, प्रशमशीलरसं विकिरत्यधः। चपल एष मनः-कपिरुच्चकै रसवणिग् विदधातु मुनिस्तु किम् ? - इति॥ **अध्यात्मसारः॥**

अपि चादान्तमनसां शुभाचारोऽपि संसारमात्रपरिणामः, एवञ्चैष हेयकोटिमेवावतरति, अन्वाह च- अनिगृहीतमना विदधत्परा न वपुषा वचसा च शुभक्रियाम्। गुणमुपैति विराधनयाऽनया ह्यपि

दुरन्तभवभ्रममञ्चति- इति॥ **अध्यात्मसारः॥**
एवञ्चान्यथासिद्धो बाह्याचारः, अतः कृत-मेतेन, मनोनिग्रह एव यतितव्यमिति॥

मैवम्, अनादृतबाह्याचाराणां ह्यत्यर्थ-मुच्छृंखलाध्यवसायगमनस्य दृष्टचरत्वात्, वाममार्गिवत्। मनःपरिणतिर्हि प्रवृत्त्य-नुपातिनी प्रायः। प्रवृत्तिश्चेदप्रशस्ता, तदा चित्तपरिणामोऽप्यप्रशस्त एव स्यात्, स्फटिकस्थानीयत्वान्मनसः, उपाधिस्थानी-यत्वाच्च बाह्यप्रवृत्तेः।

अनुभवसिद्धमिदं सर्वेषां यथा वीत-रागोपासनया तद्भावानुभूतिः, कामिनी-

दर्शनादिना च कामोद्गम इति। एवञ्च सिद्धमेव बाह्याचारस्य मनःपरिणामनियामकत्वम्। यस्त्वनिगृहीतमनसो बाह्याचारस्य प्रतिक्षेपः, स विशिष्टनिषेधतया विशेषणनिषेधे पर्यवस्यति, ततश्च मनोनिग्रहे तत्तात्पर्यं दृष्टव्यम्, न तु शुभानुष्ठानप्रतिषेधे, तस्योक्तनीत्या मनोनिग्रहोपायभूतत्वात्। यतितव्यमतोऽत्र प्रयत्नतो भवप्रपञ्चपरिमुक्तिकामैः।

अथाऽस्तु बाह्याचारस्याप्युपादेयत्वम्, किन्तु स्फटिकज्ञातं न विज्ञायते सम्यक्, उपाधिसाचिव्येऽपि तत्स्वरूपविकारविर-

हादिति चेत् ? को वा किमाह ? एवमेव शुद्धनयाभिप्रायेण। तन्मतमेवाविष्कुरुतेऽष्ट-ककारः-

**निर्मलं स्फटिकस्येव,**
**सहजं रूपमात्मनः।**
**अध्यस्तोपाधिसम्बन्धो,**
**जडस्तत्र विमुह्यति॥६॥**

**आत्मनः**- सर्वानात्मानाविलस्य चिन्मात्रचिन्तामणेः, सहजम्- आकाल-मप्यवियुक्ततया स्वभावभूतम्, रूपम् - स्वलक्षणम्, **स्फटिकस्येव** - स्वभाव-संशुद्धमणिविशेषवत्, **निर्मलम्** - अत्य-

न्तमपगतविजातीयलेशम्। स एव भवति स्वभावः, यत्र न परभावलवस्याप्यनुप्रवेशः, परस्परपरिहारेण स्थितत्वात् स्वपरभावयोः। तदेव हि स्वत्वं यत्र न परपरिणतिः, तदेव च परत्वं यत्र त्रैकालिकी स्वत्वव्यतिरिक्तता। एवं स्थिते परिशुद्धमेव पर्यवस्यति सहजमात्मस्वरूपम्।

ननु च यद्येवम्, तदा न कस्याप्यात्मनः कदापि मोहस्स्यात्, न त्वेवं दृष्टिगोचरं भवतीति चेत् ? अत्रोत्तरयति-**अध्यस्तः** - अनादिकालीननिबिडाज्ञानवशतयाऽस्थानाऽऽरोपितः, **उपाधिः** -

कर्मोदयादिना विहिताऽऽत्मसान्निध्यं शरीरादिपरद्रव्यम्, तस्य **सम्बन्धः** - आत्मना सह पारमार्थिकमैक्यम्, अध्यस्त उपाधिसम्बन्धो येन सः - **अध्यस्तोपाधिसम्बन्धः**, अत एव **जडः** - सर्वपरभावव्यतीतात्मपरमार्थस्वरूपानभिज्ञः, **तत्र** - शुद्धनयलोचनावलोकितपरिशुद्धात्मस्वरूपे, **मुह्यति** - व्यामोहमुपगच्छति। भवति हि स्वपरविवेकवञ्चितस्य व्यामोहः, लोकवत्।

यथा सत्यपि पुद्गलादिसंयोगे तत्सम्बन्धातीतं भवत्याकाशम्, स्वरूपमात्र-

निष्ठितत्वात् तदेकप्रतिष्ठितत्वाच्च तस्य, तथाऽऽत्माऽपि। न च संसारदशायामयमपि मूर्त्ततां याति, मूर्त्तसंगोगादिति वाच्यम्, अगोचरस्य तत्त्वासम्भवात्, उक्तश्च - दृशाऽदृश्यं हृदाऽग्राह्यं वाचामपि न गोचरम्। स्वप्रकाशं हि यद्रूपम्, तस्य का नाम मूर्त्तता ?॥ आत्मा सत्यचिदानन्दः सूक्ष्मात्सूक्ष्मः परात्परः। स्पृशत्यपि न मूर्त्तत्वं तथा चाहुः परेऽपि हि॥ इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः। मनसोऽपि परा बुद्धिर्यो बुद्धेः परतस्तु सः - इति॥ **अध्यात्मसारः॥**

तदेतत्स्वरूप आत्मनि मुह्यति जडः,

यथा देहस्वरूप एवायम्, पौद्गलिक एवायम्, आकालं कर्मकलङ्ककलित एवायम्, नश्वर एवायम्, प्रकृतजन्ममरण-मध्यवर्त्त्येवायम् - इत्यादि। तदेष व्यामोह उपाधिसम्बन्धाध्यवसानहेतुकः, अतस्त्या-ज्योऽयमध्यवसायः, स्वानुरूपार्थविकल-त्वात् परिणामदारुणत्वाच्च तस्य। तत्तत्त्व-मपि संसरणहेतुत्वात्तस्य, यथोक्तम् - देहा-न्तरगतेर्बीजं देहेऽस्मिन्नात्मभावना। बीजं विदेहनिष्पत्तेरात्मन्येवात्मभावना - इति (**समाधितन्त्रे**)।

अथ स्फटिके तूपाधिसान्निध्यात्तदु-

परागमात्रं सञ्जायते, प्रकृते तु मनुष्यादित-
त्तत्पर्यायपरिणतिरेवात्मनः, इति कथन्न
वैषम्यं दृष्टान्तस्येति चेत् ? न, परमार्थ-
तस्तेषां पुद्गलपर्यायभूतत्वात्, शुद्धनया-
भिप्रायतोऽनादिशुद्धत्वादात्मनः, दृश्यमा-
नपर्यायपरिणतेरूपरागस्थानीयत्वेऽनौचितिविरहात्।
एवञ्च न कापि विषमता स्फटिकोदाहरणे।
उक्तञ्च-नृनारकादिपर्यायैरप्युत्पन्नविनश्वरैः।
भिन्नैर्जहाति नैकत्वमात्मद्रव्यं सदाऽन्वयी॥
यथैकं हेम केयूर-कुण्डलादिषु वर्तते॥
नृनारकादिपर्याये तथाऽऽत्मैको निरञ्जनः॥
कर्मणस्ते हि पर्याया नात्मनः शुद्धसाक्षिणः।

कर्म क्रियास्वभावं य - दात्मा तु ज्ञस्वभाववान् - इति॥ **अध्यात्मसारः॥**

ननु च प्रतीयत एव वैषम्यं तथापि, उपाधिसाचिव्येऽपि स्फटिकरूपशुद्धत्वस्यानुभविकत्वात्, दार्ष्टान्तिके विपरीतप्रतीत्युदयाच्चेति चेत् ? तदेतदुपाधिसम्बन्धाध्यासप्रयुक्तं जडत्वमेव मूलकारोदितम्। यथैव स्फटिकस्वरूपानभिज्ञस्यानाकलितोपाधिसाचिव्यानुभावस्य रक्तत्वादिभ्रमो भवति स्फटिके, तथाऽऽत्मन्यपि तत्स्वरूपानभिज्ञस्य। परमार्थतस्तु तुल्यमेवोभयत्र स्वरूपानुसन्धानम्, यदशक्यं प्रच्यावयितुं

येन केनाप्युपाधिना। सूदाहृतमेवम्- निर्मलं स्फटिकस्येव सहजं रूपमात्मनः - इति। अतो ध्यातव्यं रूपमिदम्, एवमसदध्यासापगमादध्यात्मसौख्योदयात्। सोऽयं मोहविकारनिकाराऽऽविष्कारः परमसुखसमुदयो लोकोत्तरदशाप्रकृतिभावो विस्मयावहो लौकिकानाम्। एतदेव प्रकारान्तरतः प्रस्तौति प्रकरणकारः -

**अनारोपसुखं मोह-**
**त्यागादनुभवन्नपि।**
**आरोपप्रियलोकेषु**
**वक्तुमाश्चर्यवान् भवेत्॥७॥**

**मोहः** - अनात्मात्मीयेष्वात्मात्मीय-सम्भ्रमातिशयः, तस्य **त्यागः** - असम्भवत्पुनरुरीकारो ज्ञानगर्भितविरागभावप्रभवः परिहारः, तस्मात्, **आरोपः** - अतस्मिन् तदध्यवसायः, समुदितसञ्ज्ञानसमनुभावाद्विवृतविवेकविलोचनस्य तद्विपरीतसंवित्तिः- **अनारोपः**, तत्प्रभवं **सुखम्** - अवधीरिताशेषसुरासुरनरेश्वरत्रैकालिकसुखमध्यात्मसौख्यम्- अनारोपसुखम्, तद् **अनुभवन्नपि** - अमोघस्वहेतूपनीततया स्वसंवेदनगोचरीकुर्वन्नपि, आस्तामारोपाधीनतयाऽननुभवन्नित्यपिशब्दार्थः। आरोप

एव प्रियो येषां त **आरोपप्रियाः**। चिरपरिचितो ह्यनादौ संसार आरोपः, स च भवानुयायिनां प्रिय एव भवति, प्रियानुगुणस्य प्रियत्वनियमात्, आरोपप्रिया लोकाः - प्राकृतजनाः **आरोपप्रियलोकाः**, तेषु, **वक्तुम्** - स्वानुभूतप्रकारेण प्रतिपादयितुम्, **आश्चर्यवान् भवेत्** - विस्मयविशेषविषयस्स्यात्, तर्काणामप्यतीतत्वात्तत्सौख्यस्य वाचां तु सुतरामतीतत्वेन तत्प्रतिपादनस्याशक्यत्वात्।

नैरन्तर्येण जिनवचनपरिभावनेन हि विवेकोदयः, ततोऽपि मोहत्यागः, ततश्चा-

नारोपः, ततोऽपि सुखं वीतरागोपमम्, यत्सर्वेन्द्रादिसुखातिशयीति न किञ्चिदनुपपन्नम्। अभिहितं च - न देवराजस्य न चक्रवर्त्तिण- स्तन्नो सुखं रागयुतस्य मन्ये। यद्वीतरागस्य मुनेः सदाऽऽत्म-निष्ठस्य चित्ते स्थिरतां प्रयाति - इति॥ **हृदयप्रदीपः॥**

न चान्नादिभोगजनितमेव सुखं भवितुमर्हतीत्यतो न घटाकोटिमाटीकत एतत्सौख्यमिति वाच्यम्, सिद्धानामिव तदुपपत्तेः। न च तदपि दुर्घटमेवेति नासिद्धमसिद्धेन शक्यं साधयितुमिति वाच्यम्, स्वतःसिद्धस्वास्थ्यानां सिद्धानामन्नादि-

निरपेक्षत्वात्। एवं कण्डूज्ञाततो रतादिवैयर्थ्यमपि बोध्यम्, यथोक्तम् - किं फलोऽन्नादिसम्भोगो बुभुक्षादिनिवृत्तये। तन्निवृत्त्यां फलं किं स्यात् ? स्वास्थ्यं तेषां तु सर्वदा॥ अस्वस्थस्येव भैषज्यं स्वस्थस्य तु न दीयते। अवाप्तस्वास्थ्यकोटिनां भोगोऽन्नादेरपार्थकः॥ अकिञ्चित्त्वकरं ज्ञेयं मोहाभावाद्रताद्यपि। तेषां कण्ड्वाद्यभावेन हन्त कण्डूयनादिवत् - इति॥ **अष्टकम्॥**

नन्वेमपि किमालाम्बनं स्यात्तत्सौख्यमिति चेत् ? निरालम्बनमेवेति गृहाण। अत एव प्रकृष्टमिदम्, स्वाभाविकत्वादपगमादि-

भयविरहितत्वाच्च, तदुक्तम् - अपरायत्त-मौत्सुक्यरहितं निष्प्रतिक्रियम्। सुखं स्वाभाविकं तत्र नित्यं भयविवर्जितम् इति॥ **अष्टकम्॥**

तदेतत् सुखं संवेद्यत इहाप्यनुभवज्जीवन्मुक्तीनाम्। द्रव्यः स खलु मोक्षः, यः कृत्स्नकर्मपरिशाटनतः सिद्धिगतिगमनसम्भवः। भावोऽयं मोक्षः, यो विभावविलयप्रसूतस्वभावसौख्यसंवित्तिस्वरूपः, तथा चार्षम् - निर्जितमदमदनानां वाक्कायमनोविकाररहितानाम्। विनिवृत्तपराशाना - मिहैव मोक्षः सुविहितानाम्॥ **प्रशमरतिः॥**

एतदेवाभिप्रेत्याभिहितमन्यत्रापि - मोक्षोऽस्तु मा वाऽस्तु परमानन्दस्तु स वेद्यते खलु। यस्मिन्निखिलसुखानि भासन्ते न किञ्चिदिव॥ **योगशास्त्रम्॥**

अथेदमपि सप्रतिपक्षम्, विषयभोग एव सौख्यसंवेदनस्यानुभविकत्वात्, कष्टमात्रप्रतीतेश्चेतरत्र। न चात्रैव परमार्थसुखम्, आभासमात्रं तु विषयभोग इति वाच्यम्, उक्तानुभवेनास्य वाङ्मात्रपर्यवसानात्। नाप्यभ्यासतोऽध्यात्मसुखसंवेदनं भविष्यतीत्यतोऽत्रैव यतितव्यमिति वाच्यम्, विषयभोगे तत्क्षणमेवानुभूतसुखसंह्लादस्य मृग-

तृष्णानुकारेऽपरत्राऽऽयासाऽयोगात्। अपि च कष्टतरमेवानुभूयमानं दृष्टचरं भवतीत-रेषामध्यात्मसुखप्राप्तिप्रतिज्ञया निष्क्रान्ता-नाम्। श्रूयन्ते चानवरतं तेषामपि केषाञ्चिद् विषयसुखान्वेषणं प्रच्छन्नमित्येषोऽन्धभुज-ङ्गरन्ध्रगमनन्यायाऽऽपातः। वरतरोऽतः प्रथमत एव विषयसुखसञ्चरः, एकान्तिका-त्यन्तिकसुखोपायत्वात्तस्येति।

मैवम्, तात्त्विकाध्यात्मपथपथिकाना-माद्यक्षणत एव परमसुखरसानुभूतेः। न च तुल्यमेतदन्यत्रेति वाच्यम्, अप्रमाणत्वात् तदनुभवस्य, मोहोन्मादसंवलितत्वात्,

उन्मत्तानुभववत्। शूकरोऽपि हि तावन्नि-
मज्जति विष्टायाम्, मन्यते चाऽऽत्मानं
सुखातिशयानुभवितया। न च प्रमाणी-
क्रियते तदनुभवः, अपि तु दयापात्रतया
दृश्यतेऽसौ सद्भिः, एवं प्रकृतेऽपि
द्रष्टव्यम्। अनुभवो हि तस्यैव प्रमाणी-
कर्तुमर्हः, योऽनुन्मत्तः, अविगानमत्र
विदुषाम्। न च मोहोन्मादप्रेरिततया पशु-
क्रीडाप्रसक्तोऽनुन्मत्तः, अतः कथं प्रमा-
णीक्रियेत तदनुभवः ? कुक्कुरकृतास्थ्या-
स्वादानुभवोपमत्वात्तस्य परमार्थतो दुःख-
रूपत्वात्, तदुक्तम् - न लहइ जहा लिहंतो

मुहल्लियमट्ठियं जहा सुणओ। सोसइ तालुअरसियं विलिहंतो मन्नए सोक्खं॥ महिलाण कायसेवी न लहइ किंचि वि सुहं तहा पुरिसो। सो मन्नए वराओ सयकाय-परिस्समं सुक्खं - इति॥ **इन्द्रियपराजयः॥**

अतोऽनुन्मत्तभूतस्य शिष्टस्यैव प्रमाणीकार्योऽनुभवः। स च विरागभावोद्भूताध्यात्मसुखमेव तात्त्विकतयाऽऽख्याति, उक्तश्च- विरागहेतुप्रभवं न चेत् सुखं, न नाम तत् किञ्चिदिति स्थिता वयम्- इति॥ **सिद्धसेनीद्वात्रिंशिका॥**

एतेनाध्यात्मिकानामपि केषाञ्चिद्द्विष-

यान्वेषणदर्शनाद्विषयसुखस्यैव या पारमार्थिकतोदिता, सापि प्रतिक्षिप्ता, तेषामाध्यात्मिकत्वस्यैवाभावात्, ज्ञानगर्भितविरागविकलत्वात्तेषाम्।

किञ्च सुखमेवेदं न भवति यद्विषयाऽऽसेवनोपजनितमिति प्रथमत एव प्रतिपत्तव्यम्, बलविगमादिफलस्याध्यक्षसिद्धत्वात्, तथा चार्षम्- जो सेवइ किं लहइ ? थामं हारेइ दुब्बलो होइ। पावेइ य वेमणस्सं दुक्खाणि य अत्तदोसेण - इति।। उपदेशमाला।। ननु च न निरालम्बना भवितुमर्हति सुखप्रतीतिर्विषयेष्विति केन-

चित्तदालम्बनेन भाव्यमिति चेत् ? ओमित्युच्यते, मोहमात्रालम्बनत्वात्तस्याः, मोह एव जनयति सुखमतिं दुःखेऽपि, तथातत्स्वाभाव्यात्, कच्छुकण्डूयनवत्, तदुक्तम्- जह कच्छुलो कच्छुं कंडूयमाणो दुहं मुणइ सुक्खं। मोहाउरा मणुस्सा तह कामदुहं सुहं मुणइ - इति॥ **उपदेशमाला॥**

किञ्चान्यत्, परिणामादिपर्यालोचनेनापि दुःखमेवेदं सर्वमिति स्पष्टमीक्ष्यते विवेकिभिः, यथाभिहितम्- सर्वं पुण्यफलं दुःखं, कर्मोदयकृतत्वतः। तत्र दुःखप्रतिकारे विमूढानां सुखत्वधीः॥ परिणामाच्च

तापाच्च संस्काराच्च बुधैर्मतम्। गुणवृत्ति-विरोधाच्च दुःखं पुण्यभवं सुखम्॥ देह-पुष्टेर्नरामर्त्य - नारकाणामपि स्फुटम्। महा-जपोषणस्येव परिणामोऽतिदारुणः॥

जलूकाः सुखमानिन्यः पिबन्त्यो रुधिरं यथा।
भुञ्जाना विषयान् यान्ति दशामन्तेऽतिदारुणम्॥

तीव्राग्निसङ्गसंशुष्य-त्पयसामयसा-मिव। यत्रौत्सुक्यात्सदाऽक्षाणां, तप्तता तत्र किं सुखम् ?॥ प्राक्पश्चाच्चारतिस्पर्शा-त्पुटपाक-मुपेयुषि। इन्द्रियाणां गणे ताप-व्याप एव न निवृत्तिः॥ स्कन्धात्स्कन्धा-न्तराऽऽरोपे, भारस्येव न तत्त्वतः। अक्षा-

ऽऽह्लादेऽपि दुःखस्य, संस्कारो विनिवर्त्तते॥ सुखं दुःखं च मोहश्च, तिस्रोऽपि गुणवृत्तयः। विरुद्धा अपि वर्तन्ते दुःखजात्यनतिक्रमात्- इति॥ **अध्यात्मसारः॥**

एतेन विषयान्वेषणस्यैकान्तिकाऽऽत्यन्तिकसुखोपायत्वोक्तिः पराकृता, दुःखमात्रत्वसिद्धेस्तत्सुखाभासस्य। किन्त्वेतदेव सुखत्वेन प्रतीतमारोपप्रियाणाम्, अतस्तेषु तात्त्विकसुखसंवर्णनमाश्चर्यावहमिति न किञ्चिच्चित्रम्। उपसंहरति-

**यश्चिद्दर्पणविन्यस्त-**

**समस्ताचारचारुधीः।**

॥ ८४ ॥

**क्क नाम स परे द्रव्ये-**

**ऽनुपयोगिनि मुह्यति ?॥८॥**

**यः** - मोहोपनिषदुपविज्ञाता मुनिः, **चिद्** - सर्वभावावभासनसाधनं ज्ञानम्, तदेव **दर्पणम्** - आदर्शः, **चिद्दर्पणम्**, समस्तलोकालोकप्रतिबिम्बप्रतिधारकत्वात्, एतेनाऽऽत्मनिर्देशः कृतः, ज्ञानपर्यायत्वा-त्तस्य, तस्मिन् **विन्यस्ताः** स्वभ्यासवशेन परिणतिं प्रापिताः, **समस्ताः** - ज्ञान-दर्शन-चारित्र-तपोवीर्याभिधानाः सर्वेऽपि, **आचाराः** - अनन्तसिद्धसमादृतानि सिद्धि-साधकान्यनुष्ठानानि, तेन **चार्वी** - परि-


निर्मला, **धीः** - बोधपरिणतिपरिपूता मतिः, यस्य सः **चिद्दर्पणविन्यस्तसमस्ताचारचारुधीः**, एतेनाऽऽचाराऽऽदरेणैव विचारविमलतेत्यावेदितम्, **सः** - निर्मलाऽऽचारविचारसम्पत्परिसम्पन्नः श्रमणः **क्व** - कुत्र, अनुपयोगिनि-आत्मप्रयोजनसिद्धिविधावत्यन्तमप्रत्यलतयाऽसाधनभूते, **परद्रव्ये**-आत्मभिन्ने सजातीयविजातीयान्यतमे द्रव्ये, **मुह्यति** ? - अहं मदीयं वैतदित्याकारकव्यामोहविषयीभवति ? **नाम** - वाक्यालङ्कारः, स चानुपयोगित्वादेव परद्रव्यस्य नैवंविधः श्रमणस्तत्र मुह्यतीति ध्वनिं व्यनक्ति।

परत्वज्ञानमेव प्रवृत्तिप्रतिबन्धकं भवति प्राज्ञस्य, मन्दस्याप्यप्रयोजनप्रवृत्तिविरहात्, परस्मिंश्च स्वप्रयोजनादर्शनात्। सुखमेव हि चरमप्रयोजनं सर्वसत्त्वानाम्, तच्च नास्त्येव परस्मात्, दुःखैकयोनित्वात्तस्य, आत्मैव तु सुखैकस्रोतः, अतो यतनीयमस्मिन्, प्रयत-परमपुरुषत्वादस्य, तदाह-परः परस्ततो दुःखमात्मैवात्मा ततः सुखम्। अत एव महात्मानस्तन्निमित्तं कृतोद्यमाः - इति॥ इष्टोपदेशः॥

परद्रव्यमोह एव हेतुरनन्तभव-बम्भ्रमणस्य, स्वाभिनन्द्यमोचकत्वात् पर-

द्रव्यस्य, तथातत्स्वाभाव्यात्, अन्वाह-
अविद्वान् पुद्गलद्रव्यं योऽभिनन्दति तस्य
तत्। न जातु जन्तोः सान्निध्यं चतुर्गतिषु
मुञ्चति - इति॥ इष्टोपदेशः॥ अतो
भावनीयाऽनुपयोगिता परद्रव्यस्य। यतनीयं
च सर्वात्मना तद्व्यामोहव्यपाकरणे,
अस्यैव मोहोपनिषद्विज्ञानफलत्वादिति।
मिथ्याऽस्तु दुरुक्तं मम। शोधयन्तु
बहुश्रुताः। कृतिरिचमाचार्यकल्याणबोधेः
कर्मारिशून्यनेत्रे (२०६८) वैक्रमेऽब्दे
चैत्रासिततुर्यतिथौ समाप्तेति शम्।

# Don't Miss it.




आ. श्रीकल्याणबोधिसूरयः

સુકૃત સહયોગી

**શ્રી મહાવીર શ્વે. મૂર્તિ. જૈન સંઘ**

વિજયનગર, અમદાવાદ.

જ્ઞાનનિધિના સદ્‌વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરિ ભૂરિ અનુમોદના